# Dakshaprati Rishidadhichiproktam Shivajnanopadesham

# દક્ષપ્રતિ ઋષિદધીચિપ્રોક્તં શિવજ્ઞાનોપદેશમ્

## Document Information

Text title : Dakshaprati Rishidadhichiproktam Shivajnanopadesham

File name : dakShapratiRRiShidadhIchiproktaMshivajnAnopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | adhyAyaH 5 satIdehatyAgaH | 33-60 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# દક્ષપ્રતિ ઋષિદધીચિપ્રોક્તં શિવજ્ઞાનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

દધીચિરુવાચ ।

બ્રહ્મણો માનસઃ પુત્રો દક્ષ દક્ષોઽસિ દીક્ષિતઃ ।
કસ્માન્ન યજસે રુદ્રં સાક્ષાદધ્વરનાયકમ્ ॥ ૩૩॥

દેવદેવં વિરૂપાક્ષં યજ્ઞેશં પરમેશ્વરમ્ ।
કસ્માન્ન યજસે રુદ્રં સાક્ષાદધ્વરનાયકમ્ ॥ ૩૪॥

વિશ્વતશ્ચક્ષુષં દેવં વિશ્વતો મુખમીશ્વરમ્ ।
કસ્માન્ન યજસે રુદ્રં સાક્ષાદધ્વરનાયકમ્ ॥ ૩૫॥

વિશ્વાધિકં મહાદેવં વિષ્ણુબ્રહ્માદિનાયકમ્ ।
કસ્માન્ન યજસે રુદ્રં સાક્ષાદધ્વરનાયકમ્ ॥ ૩૬॥

વિશ્વજાતેષુ પશુષુ સ કથં પશુપો ભવેત્ ।
કસ્માન્ન યજસે રુદ્રં સાક્ષાદધ્વરનાયકમ્ ॥ ૩૭॥

યન્માયામોહિતાઃ સર્વે વિષ્ણુબ્રહ્માદયઃ સુરાઃ ।
ભવાનપિ મહાદેવં કિં ન જાનાસિ શઙ્કરમ્ ॥ ૩૮॥

કસ્માન્ન યજસે રુદ્રં સાક્ષાદધ્વરનાયકમ્ ।
બ્રહ્મણોઽસ્ય શિરશ્છિન્નં મહેશેન પિનાકિના ॥ ૩૯॥

બ્રહ્મણેઽસ્મૈ દદૌ શમ્ભુશ્ચક્રં દૈત્યવિનાશકૃત્ ।
વિષ્ણવેઽસ્મૈ મહાલક્ષ્મીં ભાર્યાત્વેન દદૌ હરઃ ॥ ૪૦॥

વૈકુણ્ઠસ્યાધિપત્યં ચ નીલકણ્ઠો દદૌ પુરા ।
ગર્વોદ્રિક્તો મહાવિષ્ણુરભૂલ્લોકવિનાશકૃત્ ॥ ૪૧॥

મત્સ્યવારાહસિહ્માદ્યૈર્દેહૈર્લોકાપકારકઃ ।
સંશિક્ષિતશ્ચ બહુધા મહાદેવેન શૂલિના ॥ ૪૨॥

તવાયં કોપદગ્ધસ્ય મહાદેવો હિ રક્ષકઃ ।
કો વાઽયં વિષ્ણુરેવાદ્ય રક્ષકસ્તે કથં ભવેત્ ॥ ૪૩॥

મૃગેન્દ્રનખરાઘાતં જમ્બુકઃ કિં સહિષ્યતિ ।
યદ્ભક્તૈર્ધિક્કૃતો વિષ્ણુઃ સહલક્ષ્મ્યાઽતિ કોપને ॥ ૪૪॥

શાપાસ્ત્રૈર્દારિતો વિષ્ણુરસ્ત્રૈઃ શિવગણૈરપિ ।
વિષ્ણોઃ કપાલં નિર્ભિદ્ય પપૌ રક્તં સ ભૈરવઃ ॥ ૪૫॥

વિષ્વક્સેનો ગણોઽસ્યૈવ વિષ્ણોઃ સમ્પશ્યતઃ પુરઃ ।
ઈષીકા પ્રોતલીક્ષેવ શૂલપ્રોતમથાકરોત્ ॥ ૪૬॥

ઇન્દ્રસ્યાસ્ય ભુજસ્તમ્ભો યેનાકારિ પિનાકિના ।
સવજઃ સસુરૈઃ પૂર્વં ગુરુણેશઃ પ્રસાદિતઃ ॥ ૪૭॥

તદા મુમોચૈવ હસન્ મહેશો ભક્તવત્સલઃ ।
યમોઽયં નિહતઃ પૂર્વં શિવપાદાગ્રતાડિતઃ ॥ ૪૮॥

મૃકણ્ડુતનયસ્યાસ્ય રક્ષાર્થં શૂલપાણિના ।
વાયુરોપોઽશિતઃ પૂર્વં તૃણાગ્રચલનેઽપ્યયમ્ ॥ ૪૯॥

મહાદેવસ્ય પુરતો નાદહત્તૃણમપ્યયમ્ ।
અગ્નિઃ શિખાવલીઢોઽયં યદ્ધુવિર્ભક્ષણેરિતઃ ॥ ૫૦॥

ચન્દ્રોઽયં તવ શાપેન યક્ષ્મરોગાર્દિતઃ પુરા ।
પ્રસાદિતો મહેશેન સુધાધામૈકમૌલિના ॥ ૫૧॥

સૂર્યોઽયં નેત્રપાતૃત્વમગચ્છચ્છઙ્કરસ્ય હિ ।
કુબેરોઽપ્યયમીશસ્ય પ્રસાદાત્સખ્યમાપ્તવાન્ ॥ ૫૨॥

વરુણો જલરોગાર્તો મહેશેન પ્રસાદિતઃ ।
વસવોઽપિ મહેશેન દયયા સમ્પ્રસાધિનઃ ॥ ૫૩॥

તત્પ્રસાદાય કર્માણિ કુર્વન્તિમુનયઃ સુરાઃ ।
તસ્ય લિઙ્ગં સદાકાલં પૂજયન્તિ સુરાસુરાઃ ॥ ૫૪॥

આદિત્યા મરુતઃ સર્વે શક્રેણ સહ ભાગિનઃ ।
ચકાર પરમેશોઽયં પ્રસાદેન મહેશ્વરઃ ॥ ૫૫॥

તથાન્યે મુનયઃ સિદ્ધા મહેશેન પ્રસાદિતાઃ ।

પશુભૂતેષુ યુષ્માસુ કથં પશુપતિઃ શિવઃ ॥ ૫૬॥

ગણ્યતે દેવદેવોઽસૌ મહાદેવઃ સનાતનઃ ।
વિશ્વાધિકો મહારુદ્રઃ પૂજનીયસ્ત્વયેજ્યયા ॥ ૫૭॥

પૂજ્યોઽયં દેવદેવેશઃ સર્વેષાં સર્વકર્મભિઃ ।
તસ્ય પ્રસાદેન તવ સફલોઽસ્તુ મનોરથઃ ॥ ૫૮॥

તત્પ્રસાદેન સર્વસ્ય ભુક્તિર્મુક્તિર્હિ સિધ્યતઃ ।
તસ્માન્મા વિપદઃ સન્તુ શૃણુ મદ્વચનં મુદા ॥ ૫૯॥

રુદ્રક્રોધાગ્નિદગ્ધસ્ય તવ નાન્યત્પરાયણમ્ ।
ન બ્રહ્માઽયં નૈવ વિષ્ણુઃ ન ચાત્ર(ન્યે)સુરપુઙ્ગવાઃ ॥ ૬૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દક્ષપ્રતિ ઋષિદધીચિપ્રોક્તં શિવજ્ઞાનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । અધ્યાયઃ ૫ સતીદેહત્યાગઃ । ૩૩-૬૦ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . adhyAyaH 5 satIdehatyAgaH . 33-60 ..

Notes:

Ṛṣi Dadhīci ઋષિ દધીચિ reprimands Dakṣa દક્ષ for not inviting Śiva શિવ to the Yajña યજ્ઞ following his feelings of insolence; and delivers Upadeśa ઉપદેશ to him about the Stature of Śiva શિવ - who Himself is Adhvaranāyaka અધ્વરનાયક.

Proofread by Ruma Dewan

*Dakshaprati Rishidadhichiproktam Shivajnanopadesham*
pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*